ISSN 976-8645

# नैवेद्यम्



**विद्यावाचस्पति डॉ. सदानन्द झा**

**मुख्यसम्पादकः**

**तवकरकमलस्थां स्फाटिकीमक्षमालां**
**नखकिरण विभिन्नां दाड़िमी बीजबुद्धया।**
**प्रतिपदमनुकर्षन् येन कीरो निषिद्धः**
**सभवतु मम भूत्यै वाणि ते मन्दहासः।।**

आध्यात्मिकविद्यागहनचिन्तकानां सुरसस्वतीसमुपासकानां जाह्नव्याः प्रचार-प्रसार विद्यौबद्ध परिकराणां प्रथियशसां पण्डितप्रकाण्डानां संस्कृतानुरागिणां पाठकानां च करकमलयोः संसारस्य प्रथमान्तर्जालीयसंस्कृतत्रैमासिकं पत्रिकायाः जह्नव्याः साम्प्रतं सप्तदशाङ्कं समर्पयन्नमन्दानन्दं लभे।

वस्तुतः ब्राह्मणेन निष्कारणो धर्मः षड्ङ्गो वेदोऽध्येयोज्ञेयश्चेति पातञ्जलमहाभाष्यवचनं स्मारं स्मारं निष्कामभावेन संस्कृत प्रचार-प्रसाराय अस्माकं प्रवत्तिर्विद्यते प्रस्तुतपत्रिका संचालने। प्रस्तुेऽस्मिन्नङ्के नानाशास्त्रनिष्णातानामनारतशास्त्रचिन्तकानां विदुषां विभिन्नराज्येभ्यः सम्प्रेषित पाण्डित्यरसाप्लाविताः शोधनिबन्धाः समलङ्कृताः सन्ति-यथा-आचार्य बदरीनाथशुक्लस्य शरीरात्मवादविमर्शः, तत्परस्तत्कालस्य सूत्रविचारः, उपनिषत्सु जीवनदर्शनम्, वैदिकपरम्परायां शाब्दबोधः, रसवद्-अलङ्कारः, अद्वैतवेदान्तदर्शने मोक्ष स्वरूपं, वाक्यपदीयकारभर्तृहरिस्तन्मतेकाल-शक्तिश्च, शाकटायनशब्दानुशासनस्य द्वितीयातत्पुरुषसमास सूत्राणां मिथः तौलनिकम् अध्ययनं प्रभृति-आलेखाः शास्त्ररसिकानां सहृदयपाठकानां मनांसि नियतं रमयिष्यन्तीति मे द्रढ़ीयान् विश्वासः अतस्तेषां विद्वत्प्रवराणां निबन्धदातृणामाचार्याणां साहाय्येन सन्ततं पत्रिकेयं पुष्पिता पल्लविता विकसिता भविष्यति एतदर्थं तान् प्रति भूयो भूयः कृतज्ञतां बिभर्मि। आशासे जाह्नवीवदेव जाह्नवी सुचिरं सर्वत्र प्रवहन्ती सहृदयजनमानसे शान्तिसुखं सन्तोषं च प्रयच्छतात्। समाहितेनापि पत्रिकायां क्वचिद्दोषो भवेत्तर्हि समाधेयो दोषज्ञैः। मुनयोऽपि भ्राम्यन्तीति का कथाऽस्मादृशानां लोचनगोचराणामिति सादरं निवेद्य विरमत्ययञ्जनः।

**श्रुतिध्वनि मनोहरा मधुरसा शुभा पावनी**
**स्मृताप्यतनुतापहृत् समवगाह सौरव्यप्रदा।**
**निषेव्य पदपङ्कजा सुकृतमूर्तिमान्याऽमला**
**समस्तजगतीतले प्रवहतादियं जाह्नवी।।**

**लखनौरम् विहारः** — **विद्वच्चरणचञ्चरीकः**

**मकर संक्रान्तिः संवत्-2070** — **झोपाख्यः सदानन्दः**